कविकल्पद्रुमः ।

महामहोपाध्याय श्रीवोपदेव गोस्वामी

विरचितोधातुग्रन्थः



परिभाषाटीका समेतः

गवर्णमेण्ट संस्कृत विद्यालयाध्यापक

श्रीतारानाथ तर्कवाचस्पति भट्टाचार्य्येण

संस्कृतः ।

KAVIKALPADRUMA

By

Vopadeva Goswami

Edited by

TARANATHA TARKAVACHASPATI.


PROFESSOR OF GRAMMAR GOOT: SANSCRIT COLLEGE.

CALCATTA.

Printed at the Ganesha Press.

1872.

कविकल्पद्रुमः ।



शब्दाकरकरग्राममर्थमण्डलमण्डलम् ।
ज्ञानात्मानमनाद्यन्तमादित्यं तमुपास्महे ॥

श्रीबोपदेवो धातुपाठं चिकीर्षुः प्रारिप्सितसमाप्तये शिष्टाचारप्राप्तं मङ्गलमाचरति शब्दाकरेत्यादि । तं प्रसिद्धमादित्यम् उपास्महे सेवामहे वयमितिशेषः । तच्छब्दोऽत्र प्रसिद्धार्थकत्वात् यच्छब्दं नापेक्षते तथाच "त केशपाशं प्रसमीक्ष्य कुर्युर्बालप्रियत्वं शिथिलं चमर्य्य" इति कालिदासः । ग्रन्थोत्कर्षख्यापनायादित्यस्य ग्रन्थस्वरूपतां प्रतिपादयन् विशेषणान्याह शब्दाकरेत्यादि । शब्दानामाकरा उत्पत्तिस्थानानि धातवइति यावत् तएव करग्रामः किरणसमूहो यस्य तम् अर्थानां मण्डलं समूहोमण्डलं यस्य तम् । तथाच "स्यान्मण्डलं द्वादशराजके च देशे समूहे ऽपि च चक्रवाड़" इति विश्वप्रकाशः । ज्ञानमात्मा यस्य तं न विद्येते आद्यन्तौ यस्य तं नित्यमित्यर्थः । पक्षे तं प्रसिद्धं पूर्व्वतरधातुग्रन्थम् उपास्महे आदित्यं सूर्य्यमिव इति लुप्तोपमा । "अयमुदयति मुद्राभञ्जनः पश्चिमोऽद्रा" मित्यादिवदसाधारणविशेषणैर्विशेष्योपस्थिति र्भवतीति तादृशविशेषणान्याह शब्दाकरेत्यादि । शब्दाकराः करग्राम इव यस्य तम् अर्थमण्डलं मण्डलमिव यस्य तम्

उभयत्र लुप्तोपमा । ज्ञानात्मानमिति ज्ञायते अनेनेति ज्ञानं ज्ञानसाधनं तदेव आत्मा यस्य तम् अनाद्यन्तमिति वेदाङ्ग्त्वान्नित्यमित्यर्थः ।

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥

सर्व्वेषां प्रवृत्त्यर्थम् आदिशाब्दिकानां मतमालोक्य क्रियत, इति वक्तव्ये आदौ जयशब्दपूर्व्वकं तन्त्रामानि संगृह्णाति "जेस्तुबन्धोस्तिवन्ती" इतिवक्तव्यादन्तुस्थाने अन्तिः जययुक्ताभवन्तु इत्यर्थः ।

मतानि तेषामालोक्य सर्व्वसाधारणः स्फुटः ।
धातुपाठः स्वदाद्यायक्रमादन्तादिमक्रमः ।
कविकल्पद्रुमो नाम पद्यैर्निष्पाद्यतेऽत्र च ।
धातवः पठिताः पाठमूलोकागमस्थिताः ।

अथ ग्रन्थस्वरूपं निरूपयति मतानीति । तेषामष्टानां मतानि ग्रन्थानालोक्य पद्यैः श्लोकैः कविकल्पद्रुमोनाम धातुपाठो निष्पाद्यते क्रियते मयेति यावत् । सर्व्वेषां प्रवृत्तये विशेषणान्याह सर्व्वसाधारण इत्यादि । सर्व्वेषां साधारणः समानः सर्व्वसम्मतत्वात् । सर्व्वशब्दस्त्विह बहुवादिपरः तेन क्षज क्षतावित्यादीनां केनचिदमन्यमानानामपि बहुवादिसम्मतत्वादिहोपन्यासः कुङ् गत्यामित्यादीनाञ्च केनचिन्मन्यमानानामपि बहु वाद्यसम्मतत्वाद्वर्জ্জनमिति । स्फुटोव्यक्तः । धातवः पठ्यन्तेऽस्मिन्निति धातु-

पाठोग्रन्थः । अत् आद्योयेषां ते अदाद्याः ते आद्या यस्मिन् सोऽदाद्याद्यः सचासौ क्रमश्चेति अदाद्याद्यक्रमः सुष्ठु अदाद्याद्यक्रमो यस्मिन् स स्वदाद्याद्यक्रमः । अत् अन्तो येषां ते अदन्ताः ते आदिमा यस्मिन् सोऽदन्तादिमः अदन्तादिमःक्रमो यस्मिन् धातुपाठे स तथा पश्चात् कर्म्मधारयः । अकाराद्यादिधातुक्रमेणाकारान्तादिधातवो वक्तव्या इत्यर्थः । अत्रापि सुशब्दोपादानात् सजातीयमध्ये विजातीयो न पाठाइत्यधिकऔत्सुक्यमिह बोध्यं । यत्तु "अथ क्लदषसङ् चेति क्लदक्लिदिजङ् रुदि" इत्येतयोर्म्मध्ये कदादीनां पठनं तत् क्लदि तु रोदने आह्वाने इत्यस्मादादौ "क्लदिजङ् रुदीति" पृथग्वाक्यगौरवभयात् । एवं "स्तृञस्तृताविति स्तृस्तृञ् प्रीतिरक्षाप्राणने" इत्येतयोर्म्मध्ये स्त्रादीनां पाठेऽपि बोध्यम् । कवीनां परमेपदादिप्रमाणलिम्पूनां तत्तद्दाढ्यत्वेन कल्पद्रुम इवेति कविकल्पद्रुमः । नामेत्यव्ययम् । अभिधेयमाह अत्र चेति । अत्र ग्रन्थे पाठसूत्रलोकागमेषु स्थिताश्चतुर्विधा धातवः पठिताः पठितुमारब्धाः आदिकर्म्मणि क्तः साङ्गोपाङ्गैरिहोदिता इत्यमरोक्तवत् । पाठस्थिताः पूर्व्वाचार्य्याणां धातुपाठेषु स्थिताः भवतिपचतीत्यादयः । सूत्रस्थिता धातुपाठेषु न दृष्टाः स्तम्भेतिस्कम्भ्नोतीत्यादयः । लोकस्थिता धातुपाठेषु सूत्रेषु च न दृष्टा महाकविप्रयोगेषुदृष्टाः प्रेङ्खोलयत्यान्दोलयतीत्यादयः । आगमस्थिता भाषाविषयेषु

धातुपाठसूत्रलोकेषु न दृष्टा वेदेष्वेव प्रयुक्ता जगाति चकेतीत्यादयः ।

पदानिड्वेड्विकरणाद्यनुबन्धगणोदितम् ।
कर्म्मोच्चारणमात्रेण स्पष्टमत्रानुबन्धतः ।

प्रयोजनमाह पदेति । पदे परस्मैपदात्मनेपदे । अनिट् इमोऽभावः । वेट् इमोविकल्पः । विकरणाः शप्श्यनादयः । आदिशब्दात् यजादिभ्वादीनां ग्रहणम् अनुबन्धाश्च गणाश्च तैरुदितम् अनुबन्धगणोदितम् । अत्र ग्रन्थे अनुबन्धोदितं पदानिड्वेड्विकरणादि कर्म्म अनुबन्धतः स्पष्टं गणोदितं कर्म्म उच्चारणमात्रेण गणोच्चारणमात्रेण स्पष्टमिति व्युत्क्रमेणान्वयः । यथा औगम्लृ गत्यामित्यत्र इमोऽभावः टाां ङप्रत्ययश्चानुबन्धोदितः । भ्वादित्वं परस्मैपदञ्च विशेषविधानाभावात् गणोदितमिति ।

परोऽनुबन्धः पूर्व्वेषामेकवाक्यस्थधातुषु ।
नाम्रेडितानुबन्धेषु न परेषाञ्च मध्यमः ।

अत्र परिभाषा भाष्यते पर इति । वाक्यमर्थकथनपर्य्यन्तम्, एकवाक्यस्थितधातुषु परः परधातुपरस्थोऽनुबन्धः पूर्व्वतरेण सम्बन्धाभावेऽपि पूर्व्वेषां सर्व्वेषामित्यर्थः । यथा टीक टिकटौकत्रौकतिङ्ङ गत्यामित्यत्र ऋकारङकारौ सर्व्वेषामिति । "आम्रेडितं द्विरुक्त" मित्यमरः । पुनरुक्तैकानुबन्धेषु धातुषु नेयं व्यवस्था । तथाच मृषत्क मृष तज् क्षान्तावित्यत्र तकारस्य पुनरुक्तत्वात् जकारो न पूर्वस्य । न परेषाञ्च

मध्यमः । मध्यमो धातुद्वयमध्यवर्त्ती अनुबन्धो द्वाभ्यां सम्बन्धेऽपि न परस्य यथा मृषत्क रूपतच्चान्तावित्यत्र ककारो न परस्य ।

अचाकारः सुखार्थोऽयानिष्ठाभावादिकर्मवेट् ।
इर्नुग्वानोरनिड्निष्ठ, उः क्त्वावेडूस्तु वेट्क्त, क्तः ।
चड्यक्रम्वोः ऽय क्त्वा, ल्यङ्वानिर्वाय एः सिचि ।
अद्वद्विरैर्यजादिः स्यादोर्निंडातव, औरिट् ।
कयुरादिः, किस्तु वा गः क्र्यादि, र्गिः ष्वादिरथदूः ।
स ल्वादि, र्वो रुहादि, ङेस्त्वङ्वान् कर्त्तरि, आत्मने ।
जोज्वलाद्यो, जिरद्यक्त, ष्टुः साधु, र्डुः स्विलय्युतः ।
णः फणादि, स्तस्वद्न्तो, दस्तजादि, भ्वादिरा: ।
नः स्वादिः, पोयुचादि, भ्रंः ग्रमादि, र्भीणिधीक्ष्मीः ।
दीर्घोजा, णिचि क्रन्दो, र्णिर्वा, दिवाद्योयादादिकः ।
लुः स्वपादिश्च, लिर्ह्रादिर्वो हृताहिः, श्नुस्तुदादिकः ।
भिः कुटादिश्च, ष्ठ्वाद्यङ्वान्, जोजचादो, ष्ठ्वेदिकः ।

अनुबन्धफलान्याह । अचाकारः सुखार्थः अत्र अनुबन्धेषु मध्ये अकारः सुखार्थः सुखोच्चारणार्थः । यथा चक्र मक्रक नामनदुत्वार्थो । अथ आ निष्ठाभावादिकर्मवेट् आ आकारानुबन्धो धातुरूपप्रकारात् एवमिकारोऽपि बोध्यम् । निष्ठा क्तक्तवतू, निडाद्या वाच्यलेव लकारयोरेव भावादिकर्म्मणी तयोः स्याने वा इट् वक्तव्यः स तयोः । आकारेतो-धातोर्भावे आदिकर्म्मणि च विहितयोः क्तक्तवतुरेव वा

इत्यर्थः यथा इर्म्मिद्यास्नेहे "भावादिढे वेति मिन्नं मेदितं तेन" प्रमिन्नः प्रमेदितः सः। भावादिकर्म्मभ्यामन्यत्र क्तक्तवत्वोरिम् नेति शेषः, यथा आदितइति मिन्नः मिन्नवान्। इर्नुण्वान् यथा वदिङ् नुत्यभिवादयोः "अतएवेदितोनुण्" वन्द्यते विष्णुः। नकारमध्यपाठेनैवेष्टसिद्धौ इदनुबन्धकरणम् अगुणे नलोपनिषेधार्थम्। ईरनिङ्निष्ठः "दीपीङ्क्ष दीपने" "नेम्डोश्खोति" दीप्तः दीप्तवान्। उः ङावेट् "चमु भक्षे" "पुक्लिशुदितइति" चमित्वा चान्त्वा। ऊस्तु वेट्कः मामान्यविधिना यस्य स्थाने इम् विहितः ऊदितः परस्य तस्य इम्वा। मिधृ गिवे शास्त्रे "वेमूदिति" असेधीत् असैत्सीत्। ऋदङ्क्रस्वः। चङि अः परेऽङि नास्ति क्रस्वो यस्य सोऽक्रस्वः। ढौकृङ् गत्यां "आङ्ग्रुङः स्व" इत्यच ऋदिदर्ज्जनात् अङ्ढौकत्। अय ऋर्वा। चङि अक्रस्व इत्यनुवर्त्तते कणृ आर्त्तस्वरे स्वाजभ्यामेति अचीकणत् अच कणत्। येषां सप्तमस्वरानुबन्धः कैश्चित् पठ्यते कैश्चिन्न पठ्यते च तेषां क्रस्वत्वि कल्पज्ञापनार्थोऽयमनुबन्धः। ल्वरङ्वान् औगमल्ल गत्यां "शालुलिढादिति" अगमत्। ऋर्वा अङ्त्वानित्यनुवर्त्तते च्युतिर क्षरणे "इरितस्तु वेति" अच्युतत् अच्योतीत्। अथ एः सिचि अङ्इः। सिचि ङ्यां विहिते सौ काटे ङतौ इषि हसादेःसेमङ्त्यच एदिङ्र्जनात् अकटीत्। ऐर्यजादिः स्यात् यजैच "व्यथग्रहेति" इयाज गङ्लपाद्योरिति इज्या। ओर्निष्ठातनः निष्ठायास्तो गोऽवयवात् नि-

ष्ठातनः रुजो शौ भङ्गे "सूल्वाद्योरिति" रुग्णः रुग्णवान्। "औरनिट् मस्जोरट्वौ" वसोरस्येत्वञ्च औदिद्वर्जनात् अमाङ्क्षीत्। कथुरादिः। गणत्क संख्याने "चुर्भ्यो जिरिति" गणयति। किन्तु वा चुरादिर्वा पक्षे गणान्तरनियमाभावात्सामान्यगणोभ्वादिरित्यर्थः युजकि संयमे योजयति योजति। चुर्भ्योजिर्वा इत्यत्र वा शब्दस्य व्यवस्थावाचित्वात् चुरादेर्जिर्नित्यः चुराद्यन्तर्गणात् युजादेस्तु वा इति। यत्तु चुरधातोरपि किकारानुबन्धत्वं मुग्धबोधे चोरयति चोरतीत्युदाहरणञ्च तत्कदाचित् चुरादेर्जेरनित्यत्वज्ञापनार्थम् अतएव काव्यकामधेनौ अकिक् लक्षणीत्यत्र स्फुटीकृतमिदं दीपदेवेन। गः क्र्यादिः, डुक्रीञ द्रव्यपर्य्यये "दिवमुतदेति" क्रीणाति। गिः प्वादिरपि। अपिगश्चात् क्र्यादिश्च पूञगि शोधे "प्वादेः स्व" इति पुनाति। अपूः स ल्वादिः। पूवर्जितः स प्वादिर्ल्वादिश्च स्यात्। लूञ गि च्छिदि लुनाति। "सूल्वाद्योरिति" लूनः लूनवान्। "क्तक्त्वेति" लूनिः। घोरुदादिः। खविर रुद रोदे "रुद्रोऽ योहस्तेति" रोदिति। "रुदाद्यस्तोति" अरोदीत्। ङस्तङ्वान् कर्त्तरि, कर्त्तरि वाच्ये तङ्वान् आत्मनेपदी। एधङ् वृद्धौ "नवश्चपमे" इति एधते। आत्मने। कर्त्तरि तङ्वानित्यनुवर्त्तते आत्मने आत्मार्थं फलवति कर्त्तर्य्यात्मनेपदीत्यर्थः अफलवति परस्मैपदीति भेदः। यजैजौ यजते यजमानः यजति याजकः। जिस्वाद्यवशःपमे इत्यादिनोभयपदप्राप्तौ जिभ्जात्मपिन्ना-

दिना नियम्यते नियमश्च फलवत्कर्त्तर्य्येवात्मनेपदमिति चेत्तर्हि अफलवत्कर्त्तर्य्यात्मनेपदनिषेधे फलवत्कर्त्तरि परस्मै पदापत्तिः। फलवत्कर्त्तर्य्यात्मनेपदमेवेति चेत् तर्हि फलवत्कर्त्तरि परस्मैपदनिषेधे अफलवत्कर्त्तर्य्यात्मनेपदापत्तिरित्युभयत्रैव व्याघातः। वस्तुतस्तु उभयपदप्राप्तौ व्यवस्थेयं फलवत्यात्मनेपदम् अफलवति परस्मैपदमिति। एतच्च पाणिनेरनुरोधात् तथाच वर्त्तमानः। इति लौकिकवाक्येषु व्यभिचारोऽतिपुष्कलः। वेदवाक्येषु यद्यस्ति नियमः केन धार्य्यते। विशेषः पाणिनेरिष्टः सामान्यं सर्व्ववर्त्मनः। सामान्यमनुगच्छन्ति तत्राचार्य्यपरम्परेति। एतेन "अकरादचिरेश्वरः क्षितौ द्विषदारभकलानि भस्मसात्" इति रघुः। "तनोति शुभ्रं गुणसम्पदा यशः" इत्यादौ फलवत्कर्त्तरि परस्मैपदम्। "फलं विश्वोपकाराय धत्ते पर्व्वणि पर्व्वणीति"। "कमलवनोद्घाटनं कुर्वते ये"। ये सूर्य्यरश्मयः। इत्यादावफलवत्कर्त्तर्य्यात्मनेपदमिति। पुराणेषु स्वार्थे णिजन्तेऽर्जकारेण णिच्येऽप्युभयपदं न स्यात् अन्यथा स्वमञ्जयति मां इत्यादेर्जानुबन्धोहत्वा स्यात्। यत्तु धातुसामान्यमनुष्यजन्यधीमोरयति घोरयते इत्युभयपदोदाहरणं तत्फलवच्चिन्नफलविशिष्टस्यात्मनेपदस्य सामान्यार्थम्। यथा नैषधे। "नालोकते यदेदानीं सामियं तेन तर्क्यते" इति। अत्र केचित्तु "आत्मनेपदमिच्छन्ति परस्मैपदिनो जनाः" इति न्यायमवलम्बन्ते। जनाः। उचितं तत्

चलविषोः "दूनीभूज्वलादेति" णः ज्वालः पचे पचादित्वादन् ज्वलः। एवं कुच ज्रोधपर्कौटिल्यलेखने दूनो भूज्वलेति णः कोचः पचे क्षगृज्ञाग्रीति कः कुचः। जिः अद्यक्तः अद्य वर्त्तमाने क्तोयस्मात् सोऽद्यक्तः। जिष्ठा स्थाने "ज्ञार्चेच्छार्थेति" स्थितोविष्णुस्तिष्ठतीत्यर्थः। टुः साधुः। ऋटृङ वेप चले "ट्वितोऽथुरिति" वेपथुः। ङस्त्रिमग्युतः। क्षत्रदडु क्षतौ "ङितस्त्रञ्" इति त्रिमक् क्षत्रिमम्। णः फणादिः फणण निस्नेहे "टुफलेति" फेणतुः पफणतुः फेणिथ पफणिथ। तस्त्वदन्तः। अदन्तानां पृथग्वर्गविधानेनैव ज्ञाने सिद्धे तानुबन्धोऽङ्गादीनां कान्तत्वादिभ्रमनिरासार्थः। दस्तनादिः। तनुदञ विस्तृतौ। "तन्भ्यः शुविति" तनोति। "सेर्लुक् तथासोरिति" अतत अतनिष्ट अतथाः अतनिष्ठाः। "वनतनाद्यनिमामिति" प्रतत्य। ध् रुधादिकः। रुधिर्धोञि आवृतौ "दिवसुतुदेति" रुणद्धि। नः स्वादिः। षुञ् सन्धाक्लेदपीडमन्थे "दिवसुतुदेति" सुनोति। पोमुचादिः मुच्ल्रृश्पञ्जो मोक्षे "नुण्रधोमुचामिति" मुञ्चति। भ शमादिः शमुभिर्थ शमे "यन्योशमादीति" शाम्यति। मोणिचौस्मोर्दीर्घो वा। घटष्ङम चेष्टे "ओसमोस्तुर्घश्चेति" अघटि अघाटि घटम्वट घाटंवाटम्। णिचि ह्रस्वः मोऽनुवर्त्तते णिचि जो ह्रस्वोह्रस्ववान्। "वटादिजनीति" वटयति। मिर्व्वा। णिचि ह्रस्व इत्यनुवर्त्तते। फणमिण गतौ 'वा शमेति' फणयति फाणयति। दिवाद्योयः दिव्यु जिगीषादौ "दिव-

सुतुदेति दीव्यति। लृ अदादिकः। अदृलौभक्षणे "लुगदभ्योऽपः" अत्ति। लुः स्वपादिश्च चकारादृदादिश्च स्वमते स्वपादेः प्रयोजनं नास्ति। दरिद्रतीत्यादौ स्वपादित्वादजादौ सार्वधातुके आद्याक्षरस्य उदात्तस्वरत्वभवति आद्युदात्तत्वमिति बोपदेवः। लिर्ह्रादिः। ह्रादेरदाद्यन्तर्गणत्वेन स्न्यातन्व्यादृदादित्वसूच कानुबन्धोन कृतः। अथवा लुः स्वपा दिश्च ह्रादिरित्येकं वाक्यम्। लु लि इत्युभयानुबन्धौ धातू क्रमात् स्वपादिह्रादी स्तः काकाक्षिगोलकन्यायेन चकार स्योभयसम्बन्धाददादौ च इत्यर्थः। ह्रादिः पृथग्गणइत्येके अतएव पठन्ति च।

"भ्वाद्यदादो जुहोत्यादिर्दिवादिस्वादि रेव च। तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयइति"। हुलि होमेऽदने "ह्रादोरे हिः" जुहोति। वीव्रतादिः। व्रत डुव ल्ट वर्त्तने "व्रज्रोनेम्यइति" तेनैव परस्मैपदे वर्त्स्यति विव्रत्सति आत्मनेपदे तु वर्त्तिष्यते अन्यत्र विव्रत्सा विवर्त्तिषा। गः तुदादिकः तुद जैाग व्यथे "दिवसुतुदेति" तुदति। शिः कुटादिश्च। चकारात्तुदादिश्च। "कुटां णुब्रौ ञ्णितोति" नियमात् कुट शि कौटिल्ये इत्यादीनाम् अकुटीदित्यादौ नगुणः। गू शि स्तवने इत्यादीनाम् अनुवीत इत्यादौ न वृद्धिः अगुणत्वादुव च। षक्रदङ्वान्। आख्यातिकस्याङोऽप्रातार्थं क्रदिति विशेषणम्। स्वमते तूभयत्र ङ्रव। डुपचौ प पच पाके "भौपिचिन्तोति" पचा।

चीजच्चादिः। जच्च च्लुघ भच्चहासयोः "हिरुत्तजच्चेति हिसंज्ञायां। "व्रिदचोऽइरिति" न नुण् जच्चत्, क्लौवे जस्शसोस्तु 'इः शतुरिति। जच्चति जच्चन्ति। आख्याति-केऽन्तौ "अन्तोऽइ" रिति जच्चति। "अनुस्सिइरिति" अजच्चुः। र वैदिकः। वै दिकोवेदेष्वेव प्रयुक्तोन तु भाषाया-मित्यर्थः। गार्लिस्तुतौ जगाति।

धातवोहन्तिभासार्थाअकितोवा चुरादयः।

इत्यनुबन्धेन फलं निरूप्य अर्थेनैव प्रयोजनं प्रथयति धातवः इति। हन्त्यर्थाहिंसार्थाः हन्तेर्हिंसार्थएव प्रसिद्ध-त्वात्। भासार्थादीप्त्यर्थाः। घटि क्वापि द्युताविल्यच द्युत्यर्थेऽपि किकरणमर्थान्तरार्थमिति वोपदेवस्वरसात्। हन्त्यर्था भासार्थाश्च ये धातवः तेऽकितोपि गणान्तर-पठिताश्चुरादयः स्युः। वाशब्दस्यानुक्तसमुच्चयार्थत्वात् कदा-चिदन्येऽपि चुरादयः स्युरित्यर्थः। एवमेव धातुपारायण-क्रमदीश्वरौ। यथा हन्लौ गतौ बधे घातयति हन्तीत्यर्थः। शुभ ङल्ल दीप्तौ शोभयति शोभतइत्यर्थः। अन्येषान्तु "इन्द्रियादेरसामर्थ्यं वक्ष्यमाणमदीदिशत्," इति भट्टवार्त्ति-कम्। "दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेष" मिति कालिदासः। "कोकिलो विष्णुरूपेण राजकन्यामजीहरत्" इतिपञ्चतन्त्रम्। "दशवर्षसहस्राणि रामोराज्यमकारय-दिति," व्यासः।

क्रादिःक्रग्दृदृधृ प्रच्छो मुह्द्रुह्ष्णुह नश्ष्णिहः।

मुहादिर्ङिद्वलन्तोऽनुदात्तेदृल्लङिद्द्युतादिकः ।

अथ स्वरूपेण फलं निरूपयति क्रादिरिति । कृश विक्षेपे, घृश निगरणे, हृङ्शादरे, धृशङ्स्थितौ, प्रच्छौश ज्ञीप्सने इति पञ्च। फलन्तु एभ्यः सनइमि चिकरिषतीत्यादि। स्वमते "स्निङ्पूङ्रन्जखित्यादिसूत्रे" एषां ग्रहणात् क्रादेः फला भावः । मुहादिरिति । मुह्यूल्लजि वैचित्त्ये, ल्टद्रुह्यूजिवांसि, ष्णुह्यूल्ल उद्गारे, णश लंयू नाशे, ष्णिह्यूल्लजि प्रीतौ । फलन्तु "मुहां घड्वेति," मुक् मोग्धा। "ह्रोढो भावितिं" मुट् मोढा इत्यादि । द्रुहस्तु घडोऽप्राप्तिपक्षे होढोभावित्यनेन ढएव न "तु दादेर्घ" इत्यनेन घः अन्यथा दादेर्घइत्यनेनैवेष्टसिद्धौ मुहादावस्य पाठो व्यर्थः स्यात् । ङिद्वलन्तो-ऽनुदात्तेत् ङानुबन्धोहलन्तोहसन्तोयोधातुः सोऽनुदात्तेत् अनुदात्तस्वरानुबन्धः परिभाषित इत्यर्थः । तेषां वेदेष्वेवो-च्चारणभेदोऽस्तीति फलम् । आत्मने पदञ्चेति केचित् । ल्टङिद्द्युतादिकः इत्युभयानुबन्धो धातुर्द्युतादिः स्यात् । द्यु ल्लङ् द्युत्यां, "शास लिदृदुदिति" परस्मैपदे अद्युतत् । लिदित्यनेनैवेष्टसिद्धौ द्युतादिपाठः प्राचामनुरोधात् ।

ष्ठिष्विडोगोयुरुनुस्नु चुष्णु हृङ्ह्रञ्विवर्जिताः ।
एकस्वरा आदिवर्णोहृदन्ता धातवोऽनिटः ।

इतिपरिभाषा ।

ट्वायोश्खोर्गतिवृद्धेग्राः, श्विज सेवने, ओ डीङ य गतौ डीङ च नभोगतौ, ग्रोङ लज्जि स्वप्ने, युल मिश्रणे, रुल ध्वनौ, रुङ बधे गत्यां, ष्णु ल प्रस्तुत्यां, क्ष्णुल तेजने, टुक्षुल क्षुते, ण्ुल स्तुतौ, वृङग सम्भक्तौ, वृनगज वृतौ। वृ इत्यनेनैवेष्टसिद्धौ उभयग्रहणं स्वरूपस्य कस्यचिदप्राप्त्यर्थम् तेन युङगबन्धे इत्यस्मादिम् न स्यात्। श्वग्रादिवर्जिता एकस्वरा ये आकारान्ता इवर्णान्ता उकारान्ता ऋकारान्ताश्चतेभ्यः सामान्यविधानादिम् न स्यात् यथा नेमेकाजाद्यृत इति। पाता जेता क्रेता श्रोता कर्त्ता। विशेषविधानात्तु स्यादेव। यथा यमरमनमेति अपासिष्टाम्। सुस्तधाःसेरिति असावीत् अधावीत्। स्यस्यर्ङन इति करिष्यति। श्वग्रादेस्तु श्वयितेत्यादि। इतिपरिभाषेति वक्ष्यमाणग्रन्थस्य संक्षेपनिर्व्वाहार्थं सङ्केतविशेषः परिभाषा इत्यर्थः।

अथ धातवो निर्द्धार्य्यन्ते। तत्रादावदन्ताः तेषु च मृष तज्वर्जेषु ककारोऽनुबन्धः सर्वेषु तकारः। ननु हसाल्लोप इत्यनेनाल्लोपस्य नित्यत्वाद्दन्तत्वं व्यर्थमिति चेन्न यतः

अल्लोपित्वं स्थानिवत्त्वञ्चादन्तत्वप्रयोजनम्।
यत्र लेते न विद्येते तत्राल्लोपविकल्पनम्।
तद्धलादेर्लघोर्घश्च पुक् चेत्यङ्गापयत्यतइति।

यथा अल्लोपित्वेन अजगवेषदित्यादौ न ह्रस्वसन्वद्भावौ। लोपोऽत्यादेशउच्यते इति न्यायात् स्थानिवत्त्वेन कृणयतीत्यादौ न गुणः गृणयतीत्यादौ न वृद्धिः। यत्र तु एते न

विद्येते अग्लोपित्वस्थानिवत्त्वयोः प्रयोजनं न सम्भवति तत्र धातौ तद्बलाद्दन्तस्वीकारबलात् अग्लोपविकल्पनम् अकारस्य स्थितिपक्षे दीर्घः पुक् च आदन्तात् यन् च स्यादतोऽङ्गापयतीति सिद्धमिति केचित्। स्वमते तु अग्लोपित्वस्थानिवत्त्वयोः कार्य्यं येषु न स्यात् ते धातवो हसन्ता एवावगन्तव्याः तेन अङ्गापयतीत्यादिप्रयोगाः स्वमतविरुद्धा इति बोद्धव्यम् नच स्वमतविरुद्धानामिहोपन्यासोऽपि विरुद्ध इति वाचम् अष्टानां मतान्यालोक्य कर्त्तव्ये परमतोपन्यासेऽपि दोषाभावात् अन्यथा कैश्चिदमन्यमानस्य क्षज्ञ्ज्ञता-विति भौवादिकस्य पाठो विरुद्धः स्यात्। किञ्च यदि तत्तन्मतैकवाक्यता क्रियते तदाग्लोपविकल्पोऽन्त्यदीर्घश्च मनीषादित्वात् साध्यः। यथा अङ्कधोर्ञिः हसाल्लोपइति अल्लोपः टौविभक्तेर्दिः ञिश्रीत्यङ्—

"नकारजाववनुस्वारपञ्चमौ झलिधातुषु।
सकारजः शकारश्च षाट्वर्गस्तवर्गजः" ॥

इति वचनात् ङस्य नप्रकृतित्वे स्यादौ नवद्र इति ङकारं हित्वा कि इत्यस्य द्वित्वे कस्य चत्वे निमित्ताभावे नैमित्तिकस्याप्यभावः इति ङस्य नत्वे नस्यानुस्वारे तस्य च ञत्वे आञ्चिकदिति। केचित्तु अङ्कइति ङप्रकृतिं मन्वानाः अङ्कि इत्यस्य ङेर्द्वित्वे आञिङ्कदित्याहुः। अत्र ह्रस्वसन्वद्भावयोरसम्भवः। अग्लोपित्वस्य गुणवृद्धेरसम्भवात् न स्थानिवत्त्वमिति। केचित्तु द्वित्वेऽपि अकारलोपस्य स्थानिवत्त्वं

मन्वानाः क इत्यस्य दित्वे अग्लोपित्वान्नसन्वत् कार्य्यम् इत्यत आश्वकदित्युदाहरन्ति ।

अकारान्तवर्गः ।

अङ्काङ्क त्क पदे लक्ष्मणंशांस त्क विभाजने ।
अर्थ त्कङ् याचने ऽन्ध त्क ट्टक्क्षयेऽघ त्क तत्कृतौ ।
अवधीर त्क वञ्चायामान्दोल त्क दोलने ।
ऊन त्क परिहाणे स्यादोज त्क बलतेजसोः ।
कथ त्क वाक्यप्रबन्धे कल त्क गतिसङ्ख्ययोः ।
स्यात्कर्व कच कर्त्त त्क शैथिल्ये कर्ण तक् भिदि ।
काल त्क कालोपदेशे कुण त्काभाषमन्वयोः ।
स्यात् कुमार कुमाल त्क केलौ केत त्क मन्त्रणे ।
निश्रावणेऽथ कूण त्क सङ्कोचेऽथ कुह त्कङ ।
विस्मायनेऽथ कूट त्क दाहे मन्त्रे क्षप त्क तु ।
दौर्बल्ये क्षप तक्ष स्यात् क्षेपे खच त्क बन्धने ।
खोट खोड़ तक क्षेपे खेट खेड़ त्क भक्षणे ।
गद त्काभ्रध्वनौ गर्व्व त्कङ् दर्पेऽथ गृह त्कङ ।
ग्रहे गण त्क सङ्ख्याने गवेष तक मार्गणे ।
गोम त्क लेपने गाच त्कङ् शैथिल्ये गुण त्क तु ।
मन्त्रे गह त्क गहने चिच त्क चयिकेचणे ।
लेख्येऽङ्कुते चह त्क स्यात् शाठ्य छद त्क संवृतौ ।
छिद्र त्क भेदे छेद त्क छेदे तीर त्क कर्म्मणाम् ।

समाप्तावथ तूण त्क सङ्कोचे तुत्थ तक् स्तुतौ ।
दुःख त्क तत्कृतौ दण्ड त् कतत्पाते ध्वन त्क तु ।
शब्दे निवास तक् स्तृत्यां प्रेङ्खोल तक चापले ।
पट त्क वेष्टने पर्ण त्क हारित्ये पद त्कङ ।
गतौ पश पश त्कानुपसर्गाद्बन्धबाधयोः ।
स्पर्शगत्योः पत त्कैश्यगत्योः पार त्क तीरवत् ।
पल्यूल पल्यूल त्क स्यात् लूनिपूत्योः पुट त्क तु ।
संसर्गे पच त्क परिग्रहे भाम त्क कोपने ।
भाज त्क तु पृथक्कृत्यां मृग त्कङ तु मार्गणे ।
मह त्क पूजे मूत्र त्क प्रस्रावे मल त्क् धृतौ ।
मृष त्क मृष तज् क्षान्तौ मिश्र त्क् युत्यां रह त्क तु ।
त्यागे रस त्क त्वास्वादे स्नेहे रूप त्क तत्कृतौ ।
रच त्क क्रत्यां रूच त्क पारुष्ये रङ्ग त्क् गतौ ।
रूष त्क स्याद्विस्फुरणे लज लज्ज त्क भासने ।
लड लाड त्क क्षेपे लल त्कोपसेवायां वर त्क च ।
वर्ण त्क स्तुतिविस्तारशुक्लाद्युद्युक्तिदीपने ।
वस त्क वासे वास त्कोपसेवायां व्यय त्क तु ।
गतौ वित्त त्क च त्यागे वात त्क गतिसेवयोः ।
सुखे वेल त्क कालार्थे वेल्ल त्क इषि वरट त्क् ।
भागे वट त्क वेष्टे च वल्यूल वल्युल त्क तु ।
पल्यूलार्थेऽथ वीज त्क व्यजने वीर तङ तु ।
शौर्ये व्रण त्काङ्गचूर्णे अथ शार शब्द त्क तु ।

दौर्बल्ये श्याम तक् मन्थे शूर त्कङ् विक्रमे शठ ।
षम ष्टम त्क वैक्लव्ये सान्त्व साम त्क सान्त्वने ।
संग्राम ङ्जतक् युद्धे स्पृह त्केप्से सट त्क तु ।
प्रकाशने सभाज त्क सेवने प्रीतिदर्शने ।
स्थूल त्कङ् ह्रंहणे सूच त्क ग्रन्थे सच तङ्क तु ।
सम्बन्धे सन्दतौ सूच त्क पैशुन्ये स्वर त्क तु ।
आक्षेपे स्तेन तक् चौर्ये स्तोम त्क श्लाघने स्तज त् ।
काम्यशब्दे सार तक दौर्ब्बल्ये सुख त्क तत्प्रतौ ।
स्फुट त्क स्फाडिसरणे स्कन्द त्क तु समाहृतौ ।
स्वन स्यम तक्ध्वाने हिल्लोल तक दोलने ।
इत्यकारन्तधातूनां मतान्यिंशच्छतं मतम् ।

आकारान्तवर्गः ।

ख्या ल् ख्यातौ कथने गा र्लिं स्तुतौ जन्मनि गा ङ्गतौ ।
घ्रा गन्धग्रहणे ज्या गि जरायां ज्ञा ग बोधने ।
ज्ञा क्ष मारणआलोके निशाने तोषणे स्तुतौ ।
ज्ञा क् प्रेरणे दा ल लूनौ दा तु दाने डु दा ञ्जि च ।
दरिद्र च लु दुर्गत्यां द्रा ल स्वप्ने पलायने ।
डु धा ञ्जि धारणे पुष्टौ दाने धाग्नियुतौ ध्वनौ ।
ष्ठा ल भक्षे प्रा ल पूर्त्तौ पा पाने पा ल रक्षणे ।
भा ल्ष दीप्तौ मा ङ्जि शब्दे मा ल्च मानेऽथ मा ङ्ग्य च ।
म्नाभ्यासे या ल्गतौ रा ल दाने ला ल् च ग्रहेऽथ वा ङ्ग् ।

सुखाप्तिगतिसेवासु स्याद्वा ल् गमनहिंसयोः ।
आ ल् खेदे आ ल्ल पाके ञि ष्ठा स्थाने षणा ल शौधने ।
ओ हाक्लि त्याग ओ हाङ्लि गतावान्तास्त्रिरष्टधा ।

इकारान्तवर्गः ।

इ इ ल् गतावधी ल् स्मृत्यामधीङ्ध्ययने र्कि लि ।
ज्ञाने ञि न्ग ष हिंसायां ञि क्षयैश्वर्ययोः ञि श ।
वासगत्योश्विरिर्न हिंसे ञिन् ञिञ् ञित्यान्तु ञिक्षि च ।
जिरिर्नहिंसे ज्याभिभवे जि जये चाथ धि श् धृतौ ।
पि श् गतौ ङुमि ञन् क्षेपे रि श् गतौ श्रि ञ सेवने ।
श्रि नञ् निशाने ट्वायोश्खोर्गतिवृद्धोः षि ङ स्मिते ।
षि न्गञ् बन्धे ष्वि कङ नादरे हिन् वर्द्धने गतौ ।
एकोनविंशतिरमी इकारान्तास्तु धातवः ।

ईकारान्तवर्गः ।

ई ल कान्ति-गति-व्याप्ति-क्षेप-प्रजन-खादने ।
ई ङ्य गत्यां क्षी ञ हिंसे ङु क्री ञग द्रव्यपर्य्ययो ।
ज्ञी गि क्षि ज्ञान ओ डी ङ्य गतौ डी ङ्च नभोगतौ ।
णी ञ प्रापण ओ दी ङ्य क्षये दीधी र्ङ्लु देवने ।
दीप्तावोधी ङ्य आराधे नादरे प्रीञ् तर्पणे ।
ष्ठी ष्ठ्व प्री गञ कान्तौ च प्री ङ्य प्रीतौ तु यी ङ्यक्तु ।
मि ञि भी क्षि भित्यां भ्री ग गि भृत्याञ्च मी ङ्य तु ।

मी ञ ग् वधे मी कि गत्यां मत्यां री गि रवे गतौ ।
ओ री ङ्य क्षरणे ली कि द्रावणे ली ङ्य ओ श्लिषि ।
ली ल्यो गि च ल्वो ग्गि गत्यां वेवी च्लुङ् वी ल ईलवत् ।
व्रो ग्गि व्रत्यां व्रोङ् य ओ च व्री गि गत्याञ्च शो ङ्ञि ।
स्वप्ने श्वो ञ ग् पचि क्ष्वी लि खञ्जेऽमी पञ्चविंशतिः ।

उकारान्तवर्गः ।

उ ङ शब्दे ऊर्णु लजाच्छादने टु चु ल क्षुते ।
कु ङ् शब्दे कु ल्च् कु ग्रिङार्त्तस्वरे क्ष्णु ल तेजने ।
खुङ् ध्वनौ गु ग्रि ओ विष्टोत्सर्गे गु घु ङ् ङ ध्वनौ ।
च्यु क् हासे सहने च्यु क्षुप् ज्यु जु ङ् गत्यां जु रंहसि ।
ष्णु ल् स्तुतौ तु ल् वृत्तिहिंसापूर्त्तिषु द्रु स्रुतौ गतौ ।
द्रु र्व दु ट्वोऽनुतापे दु गतौ द्यु लभिसर्पणे ।
धु ञ् कम्पे ञि ध्रु ग्रि ध्रु स्थैर्य्ये प्रु प्लु ङ च सर्पणे ।
यु ल्मिश्रणेऽमिश्रणे युञ् ग बन्धे युङ्ग निन्दने ।
रु ल् ध्वनौ रु ङ् वधे गत्यां स्रु गतौ स्रु न् गतौ स्रुतौ ।
पु ञ् सन्धाक्लेदपोडामन्थे षु ञ गतौ षु च ।
षु ल्वेश्वर्य्यप्रसवयोः ष्णु ल्प्रस्रुत्यां ष्टु ञ ल्स्तुतौ ।
सु ष्वर्थे सु ञ् गतौ स्कु ञ्च जुद्गतौ स्नु द्रुवत् द्रु लि ।
होमेऽदने ह्रु ङ्लु चौर्य्ये त्रयस्त्रिंशदुदन्तकाः ।

ऊकारान्तवर्गः ।

क्रू ग्रि ङार्त्तस्वरे क्रू ञ्ग शब्दे गू ओ ग्रि विट्स्रजौ ।

णू गि स्तवन ओ दू ङ्य खेदे दू न्गञ् बधे गतौ ।
धू शिक् कम्पे ध्लगि धू अच् पूङ् शोधे पू ङ्य पूञ् गि च ।
ब्रू ल जुतौ भू कङ् भू ञ प्राप्तौ भू क् शुद्धिचिन्तयोः ।
मिश्रणे भू तु सत्तायां मू ङ् बन्धे लू गिञ् छिदि ।
षू ङ्ल षू योङ् सूतौ ष् श् छेपे ऋतस्वयोदश ।

ऋकारान्तवर्गः ।

ऋ र्न हिंसे ऋ लि गत्यामृ प्रापे च क्ल ञन् बधे ।
क्ल ञ् क्लतौ क्ल ञ्द ङु च ग्ट घृ सेके घृ र्लि भासि च ।
घृ क् सेके क्षादने जृ व्यक्तीकरे जाग्ट च्लु जागरे ।
ट ङ्गादरे ट्टृ स्थगने ध्वृ कौटिल्ये धृ श ङ् स्थितौ ।
धृ च्च धृत्यां धृ क्च धृ ङ्वध्वंसे पृ लि पालने ।
पृ क्च पूर्त्तौ पृ न प्रीतौ पृ शङ् व्यायामके भृ लि ।
टुङु भृ ञ् भृतिपुष्टयोर्भृ शङ् मृतौ ह ग्न ह ञ् हृतौ ।
ह क्चाय ह ङ्ग सम्भक्तौ स्तृ ञ शब्दोपतापयोः ।
स्तृ नञ् स्तृतौ स्त क्च स्त र्लि स्त गतौ स्तृ स्मृतौ स्मृ म ।
ओन्धे स्तृ स्तृ न् प्रीतिरक्षाप्राणने हृ ध्वृवत् ह्र लि र् ।
प्रभक्षक्रत्यां ह्र ञ् ह्रत्याह्रदन्तास्त्वेकविंशतिः ।

ऋदन्तवर्गः ।

ऋ गि गत्यां कृ ञ्गि हिंसे कृ श् विक्षेपेऽथ क्ल कङ ।
विज्ञाने गृ ङ्ग विज्ञापे च गृ श्गिरणेऽथ गृ ।
गि शब्दे ज गि क्रि ज्याने ज दूर्वस्य च भृ थ च ।

तॄ तरेऽभिभवे प्लत्यां ह्व गि ह्व न् भियि ह्व य गि।
विदारे नॄ गि नॄ न्नीतौ जि पॄ गि लि तु पालने।
पॄ क्च पूर्त्तौ ह्वॄ गि ह्वत्यां भृत्यां भॄ गि भृतौ भृजि।
भर्त्सें मॄ गि बधे ह्वॄ गिञ् ह्वत्यां शॄ स्वॄ गि हिंसने।
स्तॄ जगि च्छादने प्रोक्ता ऋकारान्तास्तु षोडश।

एकारान्तवर्गः।

दे ङ् पालनेऽथ धे ट् पाने मे ङ् प्रतीदानऐ ज वे।
स्यूतौ व्ये जै ह्वतौ ह्वे जै स्पर्द्धे शब्दे षड़ेपराः।

ऐकारान्तवर्गः।

कै शब्दे चै च्चये खै तु स्थैर्य्ये खननहिंसयोः।
गै गाने ग्लै ग्लमेऽथो जै च्चये त्रै ङ् पालनेऽथ दै प्।
शोधने दो न्यक्करणे द्रै स्वप्ने ध्यै तु चिन्तने।
ध्मै ट्मो प्यै ङ् ह्वदौ पै शोषे म्लै कान्तिसंक्षये।
रै शब्द ओ वै शोषे त्रै स्नेट्टे श्यै म्यचने मतः।
श्यै ङ् गतौ षै च्चयेऽथ ष्टै वेष्टे ष्ठ्यै संहतौ ध्वनौ।
स्यै च स्नै पचि सै च्चित्यामैदन्ताः पञ्चविंशतिः।

ओकारान्तवर्गः।

क्लो य लनौ ज्यो ङ्त्रियमव्रतादेशोपनीतिषु।
दो य च्छेदे शो य् निशाने षो य् नाशे पञ्च ओपराः।

इत्यजन्ताः ।

कान्तवर्गः ।

अकि क् लक्ष्मण्यकि ङ् गत्यां चाक् म वक्रगते ऽर्कं क ।
तापस्तुत्योः कक्क हासे कक् ङिच्छागर्व्वचापले ।
ककि ङ व्रजने कुक् ङ त्वादाने किष्क कङ् बधे ।
चक च ङ्ख प्रतीघातटस्थो श्वीक कि मर्शने ।
चक्क चिक्क चुक्क कर्त्तौ टकि क् बन्धेऽथ टीक टिक् ।
ढौक चौक तिक्क ङ् गत्यां तिक् नास्कन्दे बधे तकि ।
दौस्थ्ये तक् सहने हासे तर्क क् दीप्तौ चकि क् गतौ ।
द्रेक ध्रैक्कङ् स्वनोत्साहे धक्क नक्क क नाशने ।
निष्क क् ङ माने फक्कासद्भावहारे शनैर्गतौ ।
वुक्क कि खादिशब्दे ऽथ मस्क मक्क ङ् गतौ मकि ङ् ।
भूषे रेक्कङ शङ्कायां रक्, लक, क् स्वाद आपने ।
लोक्क क् दीप्तौ लोक्क ङोक्षे वष्क वक्क ङ् गतौ वकि ङ् ।
कौटिल्येऽपि च ह्वक् ङ त्वादाने वल्क क भाषणे ।
शक ज्ञ शक् निरू शक्तौ शकि ङ त्रासशङ्कयोः ।
श्यक् श्लक् श्वकि ङ शुक् सर्पे शोक्क ङ् सेके च शोक कि ।
आमर्शे च श्लोक्क ङ मङ्घाते शुल्क क् च सर्ज्जने ।
वर्ज्जने श्वल्क क् च भाषे षेक्क ष्वक्क ङ सर्पणे ।
ष्टक स्तक् मक्क प्रतीघाते सोक क्यामर्शि सोक्क ङ ।
सेके स्वकि स्वल्क ङ च गत्यां स्वेक् सेक्क ङित्यपि ।
हिक्क ञ् कूजेऽथ हिक्क क् ङ हिंसे कान्तोनषष्टिका ।

खान्तवर्गः ।

इखिस्वोखुख्युख गतावोखृ शोषालमर्थयोः ।
कख् मे कक्ख ख्क्ख हासे णख् गतौ द्राख भ्राखृ तु ।
ओखार्थे मख् मखि यखि रखि रख् रिखि सर्पणे ।
राख् लाखृ ओखवल्लिख् श लेखने लिखि लख् लखि ।
वखि वख स्पि शाख् श्राखृ व्याप्तौ खान्तैकविंशतिः ।

गान्तवर्गः ।

अग मे वक्रगतेऽगी गि गत्यां कग् मे क्रियासु तु ।
जुगि त्यागे चगि गते लगि कम्मे गते तगि ।
खलने च तिग् न हिंसास्कन्दयोर्म्मगि सर्पणे ।
मार्ग क् संस्कारे च मार्ग क्यन्वेषे युगि वर्ज्जने ।
रग् मे शङ्के रग क् रक्तत् रग् रिग् लिगि गतौ लिगि क् ।
चिन्ते लगि गतौ खञ्जे लग् मे सङ्गे लग क् रके ।
वगि खञ्जे वुगि त्यागे वल्ग अगि श्लगि व्रजे ।
पग ष्टग मग स्थम् मे संवृतौ स्वगि सर्पणे ।
ङ्गग ह्लग्, मे संवरणे गान्ताः स्युः सप्तविंशतिः ।

घान्तवर्गः ।

अर्घ मूल्ये ऽघि ङ गतौ निन्दारम्भजवेष्वथ ।
स्याङ्गघ घग्घ हसने चघ तिघ् दघ् न घातने ।
दघि त्यागे ऽवने द्राघृ ङ श्रमायामशक्तिषु ।
ङ भ्राघृ शक्तौ मघि ङ कैतवाध्यर्थयोर्म्मघि ।

भूषे तवि क् भासि रवि ङ् गमने राघ लाष्ट ङ ।
शक्तौ लघि ङ्ङभुग्गत्योर्लंघि शोषे लघिक् त्विषि ।
वधि ङ्ङप्यर्थके शिघ्याघ्राणे श्लाष्ट ङ कत्थने ।
ष्टिघ्न ङास्कादि षघ् सघ्न हिंसे घान्तास्तु विंशतिः ।

चान्तवर्गः ।

अर्च क् पूजे अर्च चाचि चाचि अच अ् गतेऽन्चु च ।
क्लिष्टोक्तौ चान्च क व्यक्ता वुचि र्य समवायने ।
ऋच् श्र नुत्यां कुच ओधपर्ककोटिल्यलेखने ।
कुच् तारशब्दे कुच शि सङ्कोचे कच् रवे कचि ।
कच् ङ बन्धत्विषोः क्रुञ्च गत्यां क्रुन्च च वक्रणे ।
तौच्छ्ये खच ग् भूतिपूत्योरुत्पत्तौ ग्लुन्चु दुर्गतौ ।
ग्रुच ग्लुचिरु चौर्ये च चञ्चितौ चर्च केङ्समः ।
चर्च जर्च झर्च शुक्लौ भर्त्सं तन्चु ध सङ्कुचि ।
तन्च त्वञ्चि त्वच् स हत्यां पिच्च क् क्षेदे ङु औष्यच ।
पाके पचौ ङ पचिङ व्यक्तीकारे पचि क् ततौ ।
पृच् कि संयमने पृच् धौ च सम्पर्के पृचौ ल् ङ च ।
मचि ङुच्छ्रायधृत्यर्चाभाःसु मच् ङ च कल्कने ।
दम्भे शाठ्ये मुच् मुचि ङ् च मुच् क मोक्षे मुच् लृ ग्पञ्चौ ।
मोक्षे म्रुच् ल्रुच् दुर्गत्यां म्रुन्च ल्रुन्च् मन्च् म्रुन्चु च ।
टु ङु याचृञ् याचने रिच् कि सम्पर्कवियोगयोः ।
रिचि र्ज धौ विरेके रुक् ङल्ल प्रीतिप्रकाशयोः ।
लोचृ क् भासि लोचृ ङोचे लुन्चापनयने वचौ ।

वाचि वच् क च सन्देशे वचौ वाचि विचि लिंधौ ञ् ।
पृथक्त्वे व्यच शि व्याजे सम्बन्धे कङ् वन्च् वञ्चने ।
वन्चु गत्यां वर्च ङ् दीप्तौ व्रश्चू श्र् छेदे ह्वचौ ध् ह्वतौ ।
ख्वच ख्वचि शचि ङ्त्यां शच ङ् वाचि शुचिर्य जौ ।
शौचे विशरणे क्लेदे शुच् शोके षच् ङ सेचने ।
षच् सम्बन्धे षन्च गतौ षिच् प शौञ् क्षरणे ष्टुच ।
ङ प्रसादे चकारान्ताः पञ्चाशत्समुदीरिताः ।

छान्तवर्गः ।

आङ्छायामेऽथोञ्छि शुञ्छे उञ्छी श्र् बन्धसमापने ।
वर्ज्जनेऽतिक्रमेऽथर्च्छं श्र् मूर्त्तौ गमनमोहयोः ।
जर्च्छं भर्च्छं श्र भर्त्सौत्यो: प्रच्छौ श्र् ज्ञीप्सेऽथ पिच्छ श ।
मिच्छ श् बाधे म्लेच्छ् कि देश्योक्तौ मूर्च्छा मोहउच्छ्रये ।
युच्छ् प्रमादे लाञ्छि लच्छ लक्ष्मणे विच्छ क त्विषि ।
विच्छ श् गतौ वाञ्छि कामे स्वर्च्छं स्फुर्च्छा तु विस्मृतौ ।
डुर्च्छा कौटिल्यके क्रीच्छ लज्जे छान्तोनविंशतिः ।

जान्तवर्गः ।

अज क्षेपे गतेऽजि क् तु भास्यर्ज्ज त्वर्ज्जनेऽर्ज्ज क ।
संस्कारेऽन्जू घ ञि व्यक्तिगतिम्रक्षण ईजि तु ।
ईज् ङ कुत्से गतावुञ ग्राजर्वेऽथोर्ज क् जीवने ।
बलेऽथोर्ज ङ्तिस्थैर्यैर्जनार्जन ऋजिङ् भृजि ।

एजृङ् दीप्तावेजृ कम्पे ओलज्युत्क्षेपणे चजिक् ।
तङ्क्षे चजि चज ष् मङ् दागत्योः क्षीज् कूज हिक्कने ।
कर्ज पीडे कुज खुज स्तेये खर्ज व्यथास्तृजोः ।
खज् मन्थे खजि पङ्क्तुत्वे गज् मदे गजि च स्वनौ ।
गज गर्ज क् च गर्जोर्जाशब्दे ग्रजि ग्रज ध्वनौ ।
गुज श्यस्मिन् गुजि गुज कूजने जजि जज् युधि ।
जर्ज श् वाग्भर्त्सयोर्णिज् लि इच्चौ पेषे णिजि लङ् च ।
शुद्धौ तुजि क् भाषट्टार्थे तुजि प्राणे बले तुज ।
हिंसे तर्ज् कङ् तर्ज भर्त्सें त्यजौ हानौ तिज क् क्षिते ।
तिज ङ् क्षान्तौ च तन्जु ध सङ्कोचे भृजि भृज् भ्रजि ।
भ्रज् ध्वजि ध्वज् भ्रिज गतावो नज् ङो क्ष्रियि पूज क ।
पूजे पिजि क् भाषट्टार्थे पिजि ल ङ् वर्णपूजयोः ।
स्यात् पूजि ल ङ च सम्पर्के भज जौ भागसेवयोः ।
भज क् पाके भजि क् भासि भ्रेजृ ङ् च भ्राज ण ङ् टु च ।
भुजो शौ वक्रणे भुज् धौ त्राणे भक्षे भृजौ ङ तु ।
भर्जने भ्रस्जौ ज् श पाके भन्जो धौ मोटने मुजि ।
मुज् मन्ज् मार्ज क् मृजाध्वन्यो मृंज् लू ष् शुद्धौ मृजू ष् कि तु ।
भूषे च मस्जो श ट्वौ स्यात् स्नाने युज कि संयमे ।
युजिर्यौ ज् च युतौ युज् यौ ङ समाधौ युज क् ङ तु ।
निन्दे यजै जो देवार्चादानसङ्गकृतौ रुज क् ।
हिंसे रुजो शौ भङ्गे रिज् ङृज्यर्थे रन्ज् य रन्ज मौ ज् ।
रागे रेजृङ राजृ ज् ण दीप्तौ लाज् लाजि भर्त्सने ।

भर्गेऽथ लस्जो ओ लज् ङ व्रोडे लज् लजि भर्त्सने ।
लन् कान्तर्द्धौ लज लजि क् भाषट्टार्थे विजिर्लि जौ ।
वेके विजी धो दिज् ङी श्रा भीकम्पे ल् व्रज् ङि व्रज् ङ ली ।
त्यागे व्रजी कि च व्रजी ध् व्रतौ व्रज गतौ व्रज क् ।
संस्कृतौ च विरेफो तौ शिजि ल् कि ङ्ङस्फुटध्वनौ ।
